# 2017

## SANSKRIT

## [ Honours ]

## PAPER – VIII

*Full Marks* : 90

*Time* : 4 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

[NEW SYLLABUS]

### GROUP—A

1. यथेच्छं प्रश्नद्वयं समाधेयम्— 10 × 2

(क) किं नाम सामान्यम् ? तत्स्वीकारे का युक्तिः ? तच्च कतिविधम् ?

(ख) अभावस्य सामान्यलक्षणं लिख्यताम् ।
अभावस्य चत्वारो भेदाः विव्रियन्ताम् ।

(ग) यथार्थः अयथार्थश्चेति अनुभवौ सोदाहरणं व्याख्यायेताम् ।

(घ) को नाम परामर्शः ? तत्स्वीकारेण किं प्रयोजनम् इत्येतत् सर्वम् आलोच्यताम् ।

2. यथेच्छं द्वितयं संस्कृतेन देवनागर्या च व्याख्यातव्यम्— 5 × 2

(क) शब्दगुणकमाकाशम् ।

(ख) संयोगनाशको गुणो विभागः ।

(ग) सप्रकारकं ज्ञानं सविकल्पकम् ।

(घ) आप्तवाक्यं शब्दः ।

3. यथेच्छमेकस्य टीका लेख्या— 5

(क) मनः ।

(ख) स्मृतिः ।

(ग) बाधितः ।

(घ) संशयः ।

4. यथेच्छं पञ्चानां प्रश्नानां संस्कृतेन देवनागर्या च उत्तरं लेख्यम्— 1 × 5

(क) किं नाम समवायिकारणम् ?

(ख) कः सन्निकर्षः ?

(ग) किं नाम उपमानप्रमाणम् ?

(घ) कः शब्दः ?

(ङ) का पृथिवी ?

(च) किं कारणलक्षणम् ?

(छ) किमन्यथासिद्धम् ?

(ज) का स्मृतिः ?

## GROUP—B

5. यथेच्छमेकः प्रश्नः समाधेयः— 10

(क) उपनिषदित्यस्य कोऽर्थः ? बृहदारण्यकोपनिषदः साधारण-वैशिष्ट्यजातं वर्ण्यताम् ।

(ख) मरणोन्मुखजीवस्य दशा वर्णनीया ।

6. यथेच्छमेकस्य संस्कृतेन देवनागर्या च व्याख्या कार्या— 5

(क) तद् यथा तृणजलायुका तृणस्यान्तं गत्वा
अन्यमाक्रममाक्रम्यात्मानमुपसंहरति,
एवमेवायमात्मा इदं शरीरं निहत्याविद्यां
गमयित्वा अन्यमाक्रममाक्रम्यात्मानमुपसंहरति ।

(ख) तद् वै तदेतदेव तदास सत्यमेव । स यो हैतं महद् यक्षं
प्रथमजं वेद सत्यं ब्रह्मेति जयतीमान् लोकान् ।

## GROUP–C

7. यथेच्छमेकः प्रश्नः समाधेयः— 10

(क) श्रीमद्भगवद्गीता किमेकः स्वतन्त्रः ग्रन्थः उत महाभारतस्य भागविशेषः ? संशयस्यास्य समाधानं कर्तव्यम् ।

(ख) श्रीमद्भगवद्गीतायाः चतुर्थाध्यायस्य विषयः व्याख्यायताम् ।

## GROUP–D

8. यथेच्छमेकः प्रश्नः समाधेयः— 10

(क) सांख्यसम्मतं प्रमाणतत्त्वं वर्णनीयम् ।

(ख) वेदप्रामाण्यसाधकाः युक्तयो व्याख्यायन्ताम् ।

(ग) बौद्धसम्मतो विज्ञानवादः पर्यालोचनीयः ।

9. कमपि एकं विषयमवलम्ब्य टीका लेख्या— 5

(क) कर्मवादः

(ख) अपवर्गः

(ग) अज्ञानम् ।

10. यथेच्छं दशानां प्रश्नानामुत्तराणि संस्कृतेन देवनागर्या च लिप्या लेख्यानि— 1 × 10

(क) चार्वाकमते आत्मा कः ?

(ख) आत्मा कः ?

(ग) के नाम माध्यमिकाः ?

(घ) अनेकान्तवादः कः ?

(ङ) वेदान्तशब्दस्य कोऽर्थः ?

(च) वैशेषिकसम्मताः पदार्थाः कति ?

(छ) सत्कार्यवादसमर्थिका एका युक्तिः प्रदर्शनीया ?

(ज) साधारणैकान्तिकस्य एकमुदाहरणं लेख्यम् ।

(झ) किं प्रमाणम् व्याप्तिमपेक्ष्यते ?

(ञ) अनुपलब्धिः कथं प्रमाणत्वेन स्वीक्रियते ?

(ट) अज्ञानं कथमनिर्वचनीयमित्युच्यते ?

(ठ) नास्तिकशब्दस्य कोऽर्थः ?

(ड) के तावदख्यातिवाद–समर्थकाः ?

(ढ) को नाम मीमांसासूत्रभाष्यकारः ?

(ण) वेदान्तसूत्रस्य शंङ्कराचार्यकृतं भाष्यं किंनामधेयकम् ?

(त) न्यायदर्शनसम्मतं यथेच्छं हेत्वाभासद्वयं नामग्राह–मुल्लिख्यताम् ।